**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) – बहिःस्थ**

**परीक्षा: मे – २०२५**

**सत्र १ ले**

**विषय: भरतनाट्यशास्त्र (22E314)**

---

**दिनांक: २२/०५/२०२५** **गुण : १००** **वेळ : दु. २.०० ते ५.००**

---

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १. माध्यमभाषया षण्णामनुवादं कुरुत।** **(३०)**

१. देवानां वचनं श्रुत्वा ब्रह्मा विघ्नानुवाच ह । कस्माद्भवन्तो नाट्यस्य विनाशाय समुत्थिताः ॥
ब्रह्मणो वचनं श्रुत्वा विरूपाक्षोऽब्रवीद्वचः । दैत्यैर्विघ्नगणैः सार्धं सामपूर्वमिदं ततः ॥

२. दृष्टा मया भगवतो नीलकण्ठस्य नृत्यतः । कैशिकी श्लक्ष्णनैपथ्या शृङ्गाररससम्भवा ॥
अशक्या पुरुषैः सा तु प्रयोक्तुं स्त्रीजनादृते । ततोऽसृजन्महातेजा मनसाऽप्सरसो विभुः ॥

३. ब्रह्मा कुटिलकं चैव भृङ्गारं वरुणः शुभम् । सूर्यश्छत्रं शिवस्सिद्धिं वायुर्व्यजनमेव च ॥
विष्णुः सिंहासनं चैव कुबेरो मुकुटं तथा । श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ॥

४. अर्धच्छिन्ने भवेत्सूत्रे स्वामिनो मरणं ध्रुवम् । त्रिभागच्छिन्नया रज्वा राष्ट्रकोपो विधीयते ॥
छिन्नायां तु चतुर्भागे प्रयोक्तुर्नाश उच्यते । हस्तात्प्रभ्रष्टया वापि कश्चित्वपचयो भवेत् ॥

५. भारतीं सात्वतीं चैव वृत्तिमारभटीं तथा । समाश्रितः प्रयोगस्तु प्रयुक्तो वै मया द्विजाः ॥
परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया । अथाह मां सुरगुरुः कैशिकिमपि योजय ॥

६. रङ्गपीठं ततः कार्यं विधिदृष्टेन कर्मणा । रङ्गशीर्षस्तु कर्तव्यं षड्दारुकसमन्वितम्॥
कार्यं द्वारद्वयं चात्र नेपथ्यगृहकस्य तु । पूरणेमृत्तिका चात्र कृष्णा देया प्रयत्नतः॥

७. मर्त्यलोकगताः सर्वे शुभां पूजमवाप्स्यथ । अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रवर्तयेत्।॥
अपूजयित्वा रङ्गं तु प्रेक्षां कल्पयिष्यति । निष्फलं तस्य तत् ज्ञानं तिर्यग्योनिं च यास्यति॥

८. दिव्यानां मानसी सृष्टिर्गृहेषूपवनेषु च । नराणां यत्नतः कार्या लक्षणाभिहिता क्रिया॥
श्रूयतां तद्यथा यत्र कर्तव्यो नाट्यमण्डपः । तस्य वास्तु च पूजा च यथा योज्या प्रयत्नतः॥

**प्र. २. ससन्दर्भं चतुर्णां स्पष्टीकरणं लिखत ।** **(३२)**

१. त्वं पुत्रशतसंयुक्तः प्रयोक्ताऽस्य भवानघ ।
२. प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम् ।
३. अस्थिकीलकपालानि तृणगुल्मांश्च शोधयेत् ॥
४. सर्वेष्वेव तु निक्षेप्यं स्तम्भमूलेषु काञ्चनम् ।
५. अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि ॥
६. द्वारं चैकं भवेत्तत्र रङ्गपीठप्रवेशनम् ॥

**प्र.३. टिपण्णीद्वयं लिखत।** **(२०)**

पंचमवेदनिर्मितिः। विकृष्टमध्यममण्डपम्। कैशिकिवृत्तिः ।

रज्जुग्रहणस्य तथा भूमिपरीक्षणस्य महत्त्वम्। स्तंभपूजाविधिः

**प्र. ४. सविस्तरमेकं लिखत।** **(१८)**

१. नाट्यशास्त्रग्रंथस्य परिचयं लिखित्वा महत्त्वं स्पष्टीकुरुत।
२. नाट्यमण्डपनिर्माणस्य वैशिष्ट्यानि विवेचयत।
३. नाट्यं भावानुकीर्तनम्।

------------